## नवमः पाठः

# चतुरश्चौरः

आसीत् काञ्ची नाम राजधानी। तत्र सुप्रतापो नाम राजा। तत्रैकदा कस्यापि धनिकस्य धनं चोरयन्तश्चत्वारश्चौराः सन्धिद्वारि प्रशास्तृपुरुषैः शृङ्खलया बद्ध्वा राज्ञे निवेदिताः राजा च घातकपुरुषानादिष्टवान्– रे घातकपुरुषाः! इमान् नीत्वा मारयत। यतः–

**संवर्द्धनञ्च साधूनां दुष्टानाञ्च विमर्दनम्।**
**राजधर्मं बुधा प्राहुर्दण्डनीति-विचक्षणाः।।**

ततो राजाज्ञया त्रयश्चौराः शूलमारोप्य हताः। चतुर्थेन चिन्तितम्–

**प्रत्यासन्नेऽपि मरणे रक्षोपायो विधीयते।**
**उपाये सफले रक्षा निष्फले नाधिकं मृतेः।।**
**व्याधिना पीड्यमानोऽपि मार्यमाणोऽपि भूभुजा।**
**प्रत्यायाति यमद्वारात् प्रतीकारपरो नरः।।**

चौरोऽवदत्– रे रे घातकपुरुषाः! त्रयश्चौराः युष्माभिर्हता एव राजाज्ञया, मां तु राजसन्निधानं कृत्वा मारयत। यतोऽहमेकां महतीं विद्यां जानामि। मयि मृते सा विद्या अस्तं यास्यति। राजा तु तां गृहीत्वा मां मारयतु, येन सा विद्या मर्त्यलोके तिष्ठतु।

घातका अब्रुवन्– रे चौर! पापपुरुषाधम! वधस्थानमानीतोऽसि। किमपरं जीवितुमिच्छसि? कां विद्यां जानासि? कथं वा तवाधमस्य विद्या भूपालेन पूजयितव्या? चौरोऽवदत्–रे घातकाः? किं ब्रूथ? राजकार्ये विघ्नं कर्तुमिच्छथ? यूयं गत्वा निवेदयत, यदि राजा ज्ञातुमिच्छति तां विद्यां तदा गृह्णातु। कथं सा विद्या युष्मभ्यं मया दातव्या।

ततश्चौरस्य वचनैः राजकार्यानुरोधेन च सा वार्ता तैः राज्ञे निवेदिता। राजा च सकौतुकं चौरमाहूय अपृच्छत्– रे चौर! कां विद्यां जानासि? चौरोऽवदत्–देव! सर्षपपरिमाणानि सुवर्णबीजानि कृत्वा भूमौ उप्यन्ते मासमात्रेणैव च कन्दल्यो भवन्ति पुष्पाणि च। तानि पुष्पाणि सुवर्णान्येव भवन्ति। रक्तिकामात्रेण बीजेन पलसंख्याकानि भवन्ति। तद् देवः प्रत्यक्षं पश्यतु। राजाऽवदत्– चौर! सत्यमेतत्? चौरोऽवदत्–देवस्य पुरतः कस्यासत्यभाषणे शक्तिः। यदि मम वचनं व्यभिचरितं तदा मासान्ते ममाप्यन्तो भविष्यति। राजाऽवदत्–भद्र! वप सुवर्णम्।

ततश्चौरः सुवर्णं दाहयित्वा सर्षपमात्राणि बीजानि कृत्वा, राजान्तःपुरक्रीडासरस्तीरे परमनिगूढस्थाने भूपरिष्कारं कृत्वा अभाषत्–देव! क्षेत्र-बीजे सम्पन्ने, वप्ता कश्चिद् दीयताम्। राजाऽवदत्– त्वमेव किं न वपसि? चौरोऽवदत्— महाराज! यदि सुवर्णवपने एव ममाधिकारो भवेत् तदानया विद्यया कथमहं दुःखी भवामि। किन्तु चौरस्य सुवर्णवपनाधिकारो नास्ति। येन कदापि किमपि न चोरितं स वपतु। देव एव किं न वपति?

राजाऽवदत्– मया चारणेभ्यो दातुं तातचरणानां धनं चोरितम्। चौरोऽवदत्– तर्हि मन्त्रिणो वपन्तु। मन्त्रिणोऽवदन्– वयं राजोपजीविनः कथमस्तेयिनो भवामः। चौरोऽवदत्– तर्हि धर्माधिकारी वपतु। धर्माध्यक्षोऽकथयत्– मया बाल्यदशायां मातुर्मोदकाश्चोरिताः।

चौरोऽवदत्–यदि यूयं सर्वेऽपि चौराः कथमहमेको मारणीयोऽस्मि। तच्चौरवचनं श्रुत्वा सभासदः सर्वे हसितवन्तः। राजापि हास्यरसापनीतक्रोधो विहस्याकथयत्– रे चौर! न मारणीयोऽसि। हे मन्त्रिणः! कुबुद्धिरपि बुद्धिमानयं चौरो हास्यरसप्रवीणश्चः। ततो ममैव सन्निधाने तिष्ठतु, प्रस्तावे मां हासयतु खेलयतु च। इत्युक्त्वा स चौरः राजा स्वसन्निधाने धृतः।

**न चौरादधमः कश्चित् स च हासेन विद्यया।**
**मृत्यु-पाशं समुच्छिद्य राज्ञो वल्लभतां गतः।।**

**(पुरुषपरीक्षा)**

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. राज्ञः सुप्रतापस्य राजधानी का आसीत्?
२. चौराः किम् अचोरयन्?
३. काञ्ची कस्य राज्ञः राजधानी आसीत्?
४. चौरः मृत्युपाशात् कथं विमुक्तः?
५. राजा कस्य धनं चोरितमासीत्?
६. सुवर्णस्य वपने कस्य अधिकारः नास्ति?
७. सुवर्णस्य वपने कस्य अधिकारः?
८. कीदृशः नरः यमद्वारात् प्रत्यायाति?
९. राजा सकौतुकम् चौरमाहूय किमपृच्छत्?
१०. कः अवदत्– यदि यूयं सर्वेऽपि चौराः कथमहमेको मारणीयोऽस्मि?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) संवर्द्धनञ्च ..................................... विचक्षणाः।
(ख) देव ............................................ वप सुवर्णम्।
*अथवा* ततश्चौरस्य वचनैः.......................... वप सुवर्णम्।
(ग) प्रत्यासन्नेपि............................................ नरः।
(घ) घातका ............................................ दातव्या।
(ङ) ततश्चौरः सुवर्णं .................................. वपति।
(च) चौरोऽवदत्.......................................... धृतः।

**२. निम्नलिखित सूक्तिपरक वाक्यों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) प्रत्यासन्नेऽपि मरणे रक्षोपायो विधीयते।
*अथवा* उपाये सफले रक्षा निष्फले नाधिकं मृतेः।
(ख) प्रत्यायाति यमद्वारात् प्रतीकारपरो नरः।
(ग) न चौरादधमः कश्चित्।
(घ) राजधर्मं बुधा प्राहुर्दण्ड नीति–विचक्षणाः।

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) चोरों ने धनिक का धन चुराया।
(ख) राजपुरुषों ने उन्हें पकड़ लिया।
(ग) राजा ने उन्हें मृत्यु-दण्ड दिया।

## ➡ व्याकरणात्मक प्रश्न

१. **निम्नलिखित में सन्धि-विच्छेद कीजिए–**
तत्रैकदा, राजाज्ञया, रक्षोपायः, चौरोऽवदत्।

२. **निम्नलिखित शब्दों में मूल शब्द, विभक्ति एवं वचन बताइए–**
साधूनाम्, चतुर्थेन, युष्माभिः, राज्ञे, मृतेः।

३. **निम्नलिखित में धातु, लकार, पुरुष एवं वचन बताइए–**
मारयत, अपृच्छत्, वपन्तु।

## शब्दार्थ

**तत्रैकदा** = (तत्र + एकदा) वहाँ एक बार। **सन्धिद्वारि** = सेंध के द्वार पर। **विमर्दनम्** = दण्ड देना। **मृतेः** = मृत्यु से। **भूभुजा** = राजा द्वारा। **सकौतुकम्** = कौतूहल के साथ। **उप्यन्ते** = बोये जाते हैं। **पुरतः** = सामने। **व्यभिचरितम्** = गलत। **वप्ता** = बोनेवाला। **तच्चौरवचनम्** = (तत् + चौरवचनम्) चोर के उस वचन को। **हास्यरसापनीतक्रोधः** = (हास्य-रस + अपनीत + क्रोधः) हास्य रस से क्रोध दूर होने पर। **प्रस्तावे** = समय-समय पर, अवसर पर। **धृतः** = रख लिया। **समुच्छिद्य** = काटकर। **वल्लभतां गतः** = प्रिय हो गया।

●●